## खड्गमालामंत्रः फलश्रुतिः

एषा विद्या महासिद्धिदायिनी स्मृतिमात्रतः ।
अग्निवातमहाक्षोभे राज्ञो राष्ट्रस्य विप्लवे ।।१।।
लुण्ठने तस्करभये संग्रामे सलिलप्लवे। ।
समुद्रयानविक्षोभे भूमप्रेतादिके भय ।।२।।
अपस्मार ज्वरव्याधि मृत्यु क्षामाधिजे भये ।
शाकिनी पूतना यक्ष रक्ष कूष्माण्डजे भये ।।३।।
मित्रभेदे गृहभये व्यसनेष्वाभिचारिके ।
अन्येष्वपि च दोषेषु माला मन्त्रं स्मरेन्नरः ।।४।।
सर्वोपद्रव निर्मुक्तः साक्षाच्छिवमयो भवेत् ।
आपत्काले नित्यपूजां विस्तारात्कर्तुमारभेत् ।।५।।
एकवारं जपध्यानं सर्वपूजाफलं लभेत् ।
नवावरण देवीनां ललिताया महौजसः ।।६।।
एकत्र गणना रूपो वेदवेदांग गोचरः ।
सर्वागम रहस्यार्थः स्मरणात्पापनाशिनी ।।७।।
ललिताया महेशान्या मालाविद्या महीयसी ।
नरवश्यं नरेन्द्राणां वश्यं नारीवशंकरम् ।।८।।
अणिमादि गुणैश्वर्यं रंजनं पापभंजनम् ।
तत्तदावरण स्थायि देवतावृन्दमन्त्रकम् ।।९।।
मालामन्त्रं परं गुह्यं परंधाम प्रकीर्तिदम् ।
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।।१०।।
शक्तिमालापंचधा स्यच्छिवमाला च तादृशी ।
तस्माद्गोप्यतराद्गोप्यं रहस्यं भुक्तिमुक्तिदम् ।।११।।

इति श्रीवामकेश्वरतन्त्रे उमामहेश्वरसंवादे
देवीखड्गमालास्तोत्रं संपूर्णं।
।।हरिः ॐ तत्सत्।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM